लोकप्रियसाहित्यग्रन्थमाला-८

## मञ्जुनाथग्रन्थावलिः

प्रथमभागे

प्रथमखण्डः

# जयपुरवैभवम्
# गोविन्दवैभवम्

प्रधानसम्पादकः
राधावल्लभत्रिपाठी
कुलपतिः

सम्पादकौ
देवर्षि-कलानाथशास्त्री
रमाकान्तपाण्डेयः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

लोकप्रियसाहित्यग्रन्थमाला-८

## मञ्जुनाथग्रन्थावलिः

( मञ्जुनाथोपाह्वभट्टश्रीमथुरानाथशास्त्रिणां काव्यरचनानां सङ्ग्रहः )

### प्रथमभागे

प्रथमखण्डः

# जयपुरवैभवम्
# गोविन्दवैभवम्

प्रधानसम्पादकः

**प्रो. राधावल्लभत्रिपाठी**

कुलपतिः

सम्पादकौ

देवर्षि-कलानाथशास्त्री

डॉ. रमाकान्तपाण्डेयः

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# पुरोवाक्

संस्कृतभाषा यथा चिरपुरातनी सनातनी तथैव प्रतियुगं पुनःपुनर्जायमाना उषा इव नवविच्छित्तिं नूतनां च छविमाविर्भावयन्ती वरीवर्तते, अभिनवप्रभाभास्वरं प्रभातं विभावयितुं क्षमा इदानीमपि स्वे महिम्नि प्रतिष्ठिता चास्त इति जानन्त्येव सर्वे सुरभारतीसमुपासकाः। वस्तुतः आधुनिके काले अपूर्वैव समृद्धिर्दरीदृश्यते संस्कृतरचनायाः। अतश्च विंशशताब्दी संस्कृतसाहित्यस्य कश्चन स्वर्णयुग इति युक्तमुक्तवान् कविवरोऽभिराजराजेन्द्रमिश्रः। साम्प्रतिकेऽस्मिन् समये अस्या भाषाया नवोन्मेषः कामपि अभिख्यां तनोति। नैके प्रौढा विदग्धाश्च उदीयमानास्तरुणास्तेजस्विनः पण्डिताः प्रकटयन्ति शास्त्रवैभवमस्याः, तथा च कवयन्ति परःशतं सुकवयः निबध्नन्ति च विविधान् ग्रन्थान् अगणिताः साहित्यरचनानदीष्णाः सरस्वत्याः सुपुत्रा अस्यामेव भाषायाम्। परन्तु तेषु परैः क्षुण्णं मार्गं परिहृत्य अक्षुण्णमध्वानं श्रयन्तः स्वयमेव स्वीयं पन्थानं रचयन्तो भवन्ति भव्या अभिनवभावजगन्निर्माणनदीष्णा विरला एव, येषां कृतित्वेन –

**अन्धास्ते कवयो येषां पन्थाः क्षुण्णः परैर्भवेत्।**
**परेषां तु यदाक्रान्तः पन्थास्ते कविकुञ्जराः ।।**

(गङ्गावतरणमहाकाव्ये १.७७)

इति सुकवेर्नीलकण्ठदीक्षितस्य वचनं चरितार्थतां याति।

एतादृशेष्वपि विरलसाहित्यकारेषु सम्पूर्णे युगे कश्चन एक एव स्यात् युगप्रवर्तको भविष्यद्रष्टा, स्रष्टा नूतनविधानाम् आविष्कर्ता चाकृष्टक्षेत्राणां, कर्ता च नवोन्मेषसंवलित-रचनावचनावलीनाम्। एतादृशा एव साहित्यकारा आसन् भट्टश्रीमथुरानाथशास्त्रिणः मञ्जुनाथापरनामानः। नवीनाः परिकल्पनाः नवीनविषयवस्तूनामवतारो नवनवविधानां चैदम्प्राथम्येन संस्कृतसाहित्ये प्रचारः इति एतेषामेव स्पृहणीयं कार्मण्यमभवत्। एते तर्केषु कर्कशधियो वयमेव नान्ये काव्येषु कोमलधियो वयमेव नान्य इति प्राचीनानां वचः क्वचित् प्रमाणीकुर्वन्ति, क्वचिच्च –

**कश्चिद् वाचो रचयितुमलं श्रोतुमेवापरस्तां**
**कल्याणी ते मतिरुभयथा विस्मयं नस्तनोति।**
**नह्येकस्मिन् भवति सुभगः सन्निपातो गुणानां**
**एकः सूते कनकमुपलं तत्परीक्षाक्षमोऽन्यः।**

इति वा कालिदासोक्तिं स्मारयन्ति।

# भट्टश्रीमथुरानाथशास्त्रिप्रणीतटीकादिग्रन्थानां परिचयः

साहित्यवैभव-जयपुरवैभव-गोविन्दवैभवादिप्रबन्धप्रणयनप्राप्तप्रथिम्ना भट्टश्रीमथुरानाथशास्त्रिणा यथा साम्प्रतिकसंस्कृतसाहित्यस्य समुल्लासाय विरचिता विविधविधासंवलिताः काव्य-कथा-गीति-गजल-नाट्यादयो ग्रन्थास्तथैव शास्त्रसन्ततेः सातत्यं सारल्येनाविष्कर्तुं प्राचीनकाव्यानां सम्यगर्थावबोधाय च तैः केचन टीकाग्रन्थाः समीक्षाग्रन्थाश्चापि प्रणीता अभवन्। अथेह तेषां ग्रन्थानां वैशिष्ट्यं विज्ञापयितुं क्रमशः संक्षेपेण परिचयः पुरस्क्रियते।

१. रसगङ्गाधरसरला-

भारतीयकाव्यशास्त्रे पण्डितराजजगन्नाथेन नव्यन्यायशास्त्रीयपारिभाषिकपद-परिपूर्णपरिष्कारपद्धतिमवलम्ब्य प्रणीतो रसगङ्गाधराख्यः सन्दर्भः सम्प्रत्यपि सुधीसमवाये पाण्डित्यनिकषत्वेन समादृतो वर्तते। अवच्छेदकावच्छिन्न-प्रतियोगिता-अनुयोगिता-विषयता-विषयिताप्रभृतिनव्यन्यायप्रसिद्धपदप्रयोगं समवाप्य साहित्यिका ग्रन्थस्याऽस्याऽध्ययने न तथा समुत्सहन्ते। ग्रन्थेऽस्मिन् भट्टश्रीनागेशप्रणीता मर्मप्रकाशाख्यैव काचन व्याख्या लभ्यते स्म। भट्टमहाभागैः सममर्मप्रकाशव्याख्यस्य रसगङ्गाधरस्य स्वीयया सरलाख्यटीकया संवलितं संस्करणं निर्णयसागरमुद्रणालयात् प्रकाशमनायि। सेयं सरला ग्रन्थग्रन्थिभेदने तन्निगूढरहस्योद्बोधने च अध्येतॄणामुपकारिका। नागेशेनाऽस्या मतभेदोऽपि दृश्यते पदे पदे। निर्णयसागरमुद्रणालयात् गुरुमर्मप्रकाशसनाथितरसगङ्गाधरेण सह सरलायाः प्रकाशनं १९३९ तमे वर्षेऽभूत्। १९४५ वर्षं यावद् ग्रन्थस्याऽस्य षट्संस्करणानि प्रकाशितान्यभवन्निति महत्त्वमस्य स्वयमेव सिद्धम्।

रसगङ्गाधरपरिशीलने सरलाया वैशिष्ट्यं बहुभिः खलु मनीषिभिः पुरस्कृतम्। अथात्र राष्ट्रपतिसम्मानितानां विश्रुतवैदुषीकाणां पण्डितविश्वनाथमिश्रमहोदयानां तद्विषयकं मतमुपस्थाप्यते-

रसगङ्गाधरोपरि वर्तमानासु अनेक व्याख्यासु महाविदुषो नागेशभट्टस्य व्याख्या तथा विद्वद्वरस्य भट्टमथुरानाथशास्त्रिणश्च सरला व्याख्या चेति द्वे व्याख्ये स्तः महत्त्वपूर्णे। अद्यत्वे वर्तमानानां समासां व्याख्यानामाधारभूमिः सरलाव्याख्यैवेति शक्यते वक्तुम्। प्रथमाननेऽल्प-कलेवरापीयं द्वितीयानने वैशद्यमादधाना स्फोरयति रसगङ्गाधरीयं रहस्यं निपुणम्। क्वचिच्च निराकृतं नागेशाभिमतमप्यनया। ग्रन्थोऽयं गभीरतरो विवेच्यविषयाश्चाऽनेके तथापि कतिपयान्येव स्थलानि आनीयन्तेऽत्र विचारपदवीम्।

इदम्प्रथमतया तावद् विचार्यते काव्यलक्षणमेव। पण्डितराजोऽस्ति शब्दपर्याप्तकाव्य-तावादी। अतएव रमणीयार्थप्रतिपादकः शब्दः काव्यमिति लक्षणयाञ्चकाराऽसौ। अर्थनिष्ठा

साहित्याम्बुधिसंविहारनिपुणः शब्दागमज्ञाग्रणीः
छात्राध्यापनलग्नधीः शुचिमनाः काव्यप्रबन्धोद्धुरः।
छन्दःस्वेकघनाक्षरप्रियतमो देवर्षिवंशोज्ज्वलः
चित्रेऽयं प्रतिभाति भट्टमथुरानाथाभिधः कोविदः।।



भट्टश्रीमथुरानाथशास्त्री "मञ्जुनाथः"

(१८८९-१९६४)

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली